# Ishvaraproktam Somavaravratamahimavarnanam

# ईश्वरप्रोक्तं सोमवारव्रतमहिमावर्णनम्

## Document Information

Text title : Ishvaraproktam Somavaravratamahimavarnanam

File name : IshvaraproktaMsomavAravratamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 28 somavAravratamahimA | 7-49||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# ईश्वरप्रोक्तं सोमवारव्रतमहिमावर्णनम्

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवपार्वतीसंवादे -

पार्वत्युवाच ।

देव देव महादेव त्रिकालज्ञ त्रिलोचन ।
किं तव प्रीतिकृच्छम्भो व्रतं सर्वाघनाशनम् ॥ ७॥

पुमर्थदायकं शर्व सर्वेषां कथयस्व मे ।
तस्यास्तद्वदनाम्भोजं पीत्वा लोचनषट्पदैः ॥ ८॥

प्राह देवो विरूपाक्षः प्रत्यक्षमवदद्व्रतम् ।

शिव उवाच ।

शृणु पद्मपलाशाक्षि व्रतं मे प्रीतिदायकम् ॥ ९॥

साधु साधु महाप्राज्ञे सर्वलोकोपकारकम् ।
यन्न कस्यचिदाख्यातं तदद्य कथयामि ते ॥ १०॥

सर्वकामप्रदं दिव्यं सर्वरोगनिवारकम् ।
ब्रह्मविष्ण्वादिभिर्देवैः कृतमेतन्महाव्रतम् ॥ ११॥

नरो वा यदि वा नारी द्विजो वाप्यद्विजोऽपि वा ।
कृत्वा व्रतमिदं पुण्यं मम लोकं स विन्दति ॥ १२॥

सर्वेष्वपि च मासेषु प्रशस्तं सर्वकामदम् ।
गदन्ति निगमाः सर्वे शिष्टं सोमव्रतं त्विति ॥ १३॥

सोमवारव्रतं दिव्यं द्विजानामेव केवलम् ।
नराणामथ नारीणां सौभाग्यारोग्यवर्धनम् ॥ १४॥

श्रावणे कार्तिके वापि गृहीतनियमो व्रती ।

पूजयेन्मां महादेवि सोऽचिरान्मुक्तिभाग्भवेत् ॥ १५॥

देव्युवाच ।

कथं सोमव्रतं कार्यं को विधिः पूजनं कथम् ।
कस्मिन् काले च कर्तव्यं सर्वं विस्तरतो वद ॥ १६॥

शिव उवाच ।

श्रावणेऽस्मिन् वरे मासि त्वत्पितुर्मौलिसंस्थितम् ।
केदारेशमहालिङ्गसन्निधौ नियमाद्व्रती ॥ १७॥

सङ्कल्प्य वत्सरं वापि त्रीणि द्वादश वाऽम्बिके ।
सङ्क्ल्प्य ब्राह्मणैः सार्धं व्रतमेतत्समाचरेत् ॥ १८॥

अस्य केदारनाथस्य श्रावणे सोमवासरे ।
पूजा कार्य विशेषेण शाम्भवैर्विविधैः शुभैः ॥ १९॥

सोमवारव्रतं कार्यं प्रयत्नेन यथाविधि ।
ब्राह्मणैरेव नियमादाजन्मान्तं महेश्वरि ॥ २०॥

यत्नादुपोषणं कार्यमन्यथा निशि भोजनम् ।
उपवासी पूजयेन्मां रात्रौ यामचतुष्टयम् ॥ २१॥

परेद्युर्मां समभ्यर्च्य निवेद्याशीत भावतः ।
सर्वेष्वपि च मासेषु सोमवारः प्रशस्यते ॥ २२॥

कृष्णपक्षे विशेषेण तस्य नोद्यापनं शिवे ।
नक्तभुग्यदि भक्तः स्यात्क्षारवर्जान्नभुग्भवेत् ॥ २३॥

यन्निवेदितमीशाय तदश्नीयाद्यथाविधि ।
मधुमांसं वर्जीत नक्ताशी सर्वदा शिवे ॥ २४॥

वत्सरे वत्सरान्ते वा द्वादशाब्दे त्रिहायने ।
नक्ताशनोद्यमं कुर्यादुपवासी न सञ्चरेत् ॥ २५॥

अन्येष्वपि महादेवि शिवक्षेत्रेष्वथारभेत् ।
अयुक्ते नियतं नित्यं भक्तो नक्ताशनो भवेत् ॥ २६॥

सोमवारेषु वा देवि भूतायामष्टमीषु वा ।
पर्वस्वपि विशेषेण सोऽमास्वपि च शङ्करि ॥ २७॥

शाम्भवो नन्दिनं नक्तं तत्र सम्पूज्य हव्यभुक् ।
कार्तिके प्रारभेद्वापि अरुणाचलसन्निधौ ॥ २८॥

सोमवारव्रतं देवि सङ्कल्प्यैव हि पूर्ववत् ।

ईश्वर उवाच ।

अत्रेतिहासं वक्ष्यामि शृणि शैलसुतेऽनघे ॥ २९॥

चाक्षुषस्यान्तरे देवि दक्षो मेधाय दीक्षितः ।
सर्वैः सुरासुरैर्देवि ब्रह्मविष्ण्वादिभिर्द्विजैः ॥ ३०॥

मामनादृत्य त्वां चापि यज्ञं कर्तुं प्रचक्रमे ।
सुराद्या वीरभद्रेण शिक्षिता दीक्षितोऽपि हि ॥ ३१॥

चन्द्रोऽमृतमयश्चायं निष्पिष्टः करपङ्कजैः ।
सोमो हीनामृतो गौरि रोहिण्यामायजत्तदा ॥ ३२॥

केदारे सोमनाथाख्यं लिङ्गं संस्थाप्य पूजयन् ।
स पुनर्दक्षशापेन पीडितो मामनूनुवत् ॥ ३३॥

बलीवर्दमावर्धयन्मार्दवेन
क्रुधा त्रैपुरं निर्दहन्नर्द ते यः ।
इनाक्ष्णैव हार्दं तमोनाशयन् लोक-
जालं सशोकं पुनीते महेशः ॥ ३४॥

ततस्तुष्टोऽस्म्यहं देवि तस्य स्तुत्या च भक्तितः ।
सोमवारव्रतस्यास्य प्रभावेण गिरीन्द्रजे ॥ ३५॥

तेनोक्तं यदि तुष्टोऽसि तिष्ठात्रस्थो निरन्तरम् ।
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ ३६॥

तावन्मे स्थापिते लिङ्गे उमया सह तिष्ठ भोः ।
रोहिण्याश्च पतिश्चैवं प्रार्थयित्वा च मां शिवे ॥ ३७॥

ततः शुद्धशरीरोऽसौ गगनस्थो विराजते ।
ममोत्तमाङ्गे देविशि स्थानं दत्तं विशेषतः ॥ ३८॥

देवान् प्रीणाति सद्योऽपि सोमधर्मप्रदानतः ।
प्रथमां पिबते वह्नि द्वितीयां भास्करः शिवे ॥ ३९॥

तृतीयामथ देवेन्द्रश्चतुर्थीं मरुतोऽखिलाः ।
वसवः पञ्चमीं तस्य कलां षष्ठीं तु वासवः ॥ ४० ॥

आदित्याः सप्तमीं देवि रुद्रास्तस्याष्टमीं कलाम् ।
नवमीं ऋभवो देवि दशमीं यक्षगुह्यकाः ॥ ४१ ॥

एकादशी शिवे साध्या द्वादशीं विष्णुरेव हि ।
ब्रह्मा त्रयोदशीं तस्य निर्ऋतिस्तु चतुर्दशीम् ॥ ४२ ॥

अमावास्यासु पितरः कलां तस्य पिबन्ति हि ।
सोमोऽमृतमयो देवि देवानां भोजनं शशी ॥ ४३ ॥

कलाभिः पोषयन् देवान् ओषधीनां गणं शिवे ।
सोमवल्लीषु नितरां यज्ञार्थं सोम आहितः ॥ ४४ ॥

सोमेनादित्यबलिनः सोमेन पृथिवी मही ।
सर्वेषामथ ऋक्षाणां मध्ये वै सोम आस्थितः ॥ ४५ ॥

इत्येषा बह्वृचानां हि श्रुतिराह महेश्वरि ।
सर्वेषां जनिता सोम शक्रविष्ण्वनिलात्मनाम् ॥ ४६ ॥

तस्मात्तदाविष्टतया सोमवल्लीभिरेव हि ।
प्रवर्धयन्ति यज्ञांश्च सौम्या ये ब्राह्मणाः शिवे ॥ ४७ ॥

तस्माद्यज्ञेषु सर्वेषु अग्नीषोमः पशुः स्मृतः ।
तस्माद्व्रतमिदं देवि सोमवारं ममेष्टदम् ॥ ४९ ॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं सोमवारव्रतमहिमावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः २८ सोमवारव्रतमहिमा । ७-४९ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 28 somavAravratamahimA . 7-49..

Notes:

Śiva शिव describes to Pārvatī पार्वती about worshiping Him and observing Vrata व्रत on Somavāra-s सोमवाराः - especially those of Śrāvaṇa श्रावण and Kārtika कार्तिक māsa मास.

He outlines the Somakalā-s सोमकलाः wrt the tithi-s तिथि, that form the nourishment of the Deva-s देवाः.

Selected ślokas are presented on this page.

Proofread by Ruma Dewan

---

*Ishvaraproktam Somavaravratamahimavarnanam*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*